National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 55-56
© 2019 NJHSR
www.sanskritarticle.com

**डॉ. कपिलदेवः**
अतिथिशिक्षकः(ज्योतिषम्)सनातनधर्म,
आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

**Correspondence:**
डॉ. कपिलदेवः
अतिथिशिक्षकः (ज्योतिषम्)सनातनधर्म
आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# वास्तुशास्त्रानुसारं ग्रामस्य मुख्यद्वारविमर्शः

**डॉ. कपिलदेवः**

मनुष्यः स्वानुभवैर्ज्ञातं यद् द्वारस्य तस्य जीवने कियत् महत्त्वपूर्णमस्ति । हि तेन द्वारं देवस्वरूपे परिकल्प्य पूजनमपि कृतम् । गृहद्वारं प्रति मोहस्तु एतादृश आसीत्, का अपि प्राकृतिकापदाः प्राप्य स द्वारं प्रत्येव गच्छति स्म । तथा च द्वारं प्राप्य एवञ्च द्वारमावावृत्य एव सुखमनुभवति स्म ।

तया दृष्ट्या गृहम् आभित्तियुक्तमेव न भवति, अपि तु द्वारेण गृहस्य निर्माणं पूर्णं भवतीति । द्वारेणैव स सुरक्षितजीवनं यापयति । तस्य जीवनपद्धति-विचार-शयन- निवासादिसर्वं परवर्त्तितमभवत्, परञ्च मूलद्वारनिर्माणं कर्त्तव्यमिति भावः कदापि न परिवर्त्तितः, न च भविष्यति ।

ग्रामे च वास्तुकल्पना -

**'गृह-नगर-ग्रामेषु च सर्वत्रैव प्रतिष्ठिता देवाः ।**
**तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः ॥'**[1]

यथा गृहे वास्तुपुरुषोऽस्ति तथैव सम्पूर्णग्रामनगरयोरपि वास्तुपुरुषस्य कल्पनां कृत्वा मर्ममहामर्मस्थानयोर्भेदनं न कर्त्तव्यमेवञ्च यथोचितदिग्भेदेन वर्णानुसारं जनान् बोधनं कर्त्तव्यम् ।

वर्णानां वासस्थानम् -

**'वासगृहाणि च विन्द्याद्विप्रादीनामुदग्दिगाद्यानि ।**
**विशतां च यथा भवनं भवन्ति तान्येव दक्षिणतः ॥'**[2]

ग्रामनगरयोर्यथासभवमुत्तरदिशि ब्राह्मणवर्णः, पूर्वदिशि क्षत्रियवर्णः, दक्षिणदिशि वैश्यवर्णस्तथा पश्चिमदिशि शुद्रवर्णस्यावासो भवेच्चेद्विशेषसुभं भवति ।

नगरे गृहे वा कोणविचारः -

**'ऐशान्यादिषु कोणेषु संस्थिता बाह्यतो गृहस्यैताः ।**
**चरकी विदारिनामाऽथ पूतना राक्षसी चेति ॥'**
**'पुरभवनग्रामाणां ये कोणास्तेषु निवसतां दोषाः।**
**श्वपचादयोऽत्यजात्यास्तेष्वेव विवृद्धिमायान्ति ॥'**[3]

ग्राम-नगर-गृह-भवनादिषु चतुर्षु कोणेषु ईशानकोणे चरकी, अग्निकोणे विदारी, नैऋत्यकोणे पूतना तथा च वायव्यकोणे राक्षसी योगिनी च निवसति । अतः ग्रामनगरयोरेतेषु कोणेष्वन्त्यज-श्वपच-चाण्डालादीनां हीनकर्मजनानां निवासः कर्त्तव्यः ।

**'दैर्घ्ये नवांशा पदमत्र सव्याद् द्वारं शुभं प्राक्त्रिचतुर्थभागे ।**
**चतुर्थषष्ठे दिशि दक्षिणस्यां पश्चाचतुःपञ्चमके तथोदक्॥'**[4]

ग्रामस्य सामूहिकद्वारस्य व्यवस्थायां दीर्घस्याथवा यस्यां दिशि द्वारनिर्माणं करणीयं

तस्याः विस्तारस्य नवभागान् कृत्वा पूर्वादिदिक्क्रमानुसारं द्वारनिर्माणं कर्त्तव्यम्, पूर्वदिशि तृतीयचतुर्थभागयोः, दक्षिणदिशि चतुर्थषष्ठभागयोः, उत्तरपश्चिमदिशौ च चतुर्थपञ्चमभागयोर्द्वारं शुभं भवति ।

अधुना ग्रामस्य मुख्यद्वारभागे कल्पनीयकल्पनलक्षणकथानत्मकम् –

**'ग्रामाणापि सर्वेषां दुर्गुणञ्च पुरामपि ।**
**मुख्यद्वारं व्यक्तरूपं यथामानं प्रकल्पयेत् ॥'[5]**

मण्डकादिसर्वविधग्रामाः भवेयुर्दुर्गो भवेयुरथवा नगरपुरादयो भवेयुस्तेषां मुख्यद्वाराणि व्यक्तरूपेण निर्धारितमानानुसारेण कल्पितानि भवितव्यानि।येषां पथिको दूरादेव ग्रहणं कर्त्तुं समर्थो भवेत् । '

**'गोपुरस्थापनाद्वापि महामण्टकल्पनात् ।**
**महास्तम्भस्थापनाद्वा महावृक्षप्रवर्धनात् ॥'[6]**

ग्रामस्य मुख्यद्वारमेवं सुव्यक्तं भवेत् यत् तस्य सम्मुखे गोपुरस्य महामण्डपस्य वा स्थापना सुलभा भवतु । तत्र महास्तभस्य निर्माणमपि भवितुमर्हति तथा च वर्धनशीलमहावृक्षस्यापि स्थापना भवितुमर्हति । इति ।

**'अट्टापथस्थापनाद्वा घण्टास्थानप्रकल्पनात् ।**
**तटाकसहितं वापि सन्निकृष्टमहीरुहम् ॥'[7]**
**जलाशययुतं वापि नदीह्लदसमन्वितम् ।**

तत्र ईष्टिकासुधाभिरट्टापथस्तम्भस्य निर्माणं कर्त्तुं शक्यते । अनेनैव प्रकारेण तत्र समयसूचनार्थं घटागृहस्य निर्माणमपि भवितुमर्हति । मुख्यद्वारस्य पार्श्वे तडागः सघनवृक्षावली चापि सौन्दर्यवर्धने सहायकौ स्तः । एवं तत्र पेयजलार्थं जलाशयस्य निर्माणमपि भवितव्यम् ।

मुख्यद्वारस्थले नानास्थानानि स्थापयेत् –

**'सुरक्षितं योधगणैर्भटैर्वा भृत्यकैरपि ।**
**सायुधन्तु पुरद्वारं रक्षणीयं विशेषतः ॥'[8]**

ग्रामस्त सुरक्षानिमित्तं मुख्यद्वारे सदैव सायुधैर्योधगणभट्टान् नियुक्तं कर्त्तव्यम् । विशेषप्रकारेण एभिर्द्वारस्य रक्षा कर्त्तव्या।

**'एकं द्वयं त्रयं वापि चतुष्कं मेलनं भुवः ।**
**विहारस्थानकोपेतं दर्शनस्थानकं तथा ।।'[9]**

तत्र एकस्य द्वयोः त्रयाणां चतुर्णां वा अन्यक्षेत्रेभ्य आगतानां महापथानां मेलनस्थानं निर्मितव्यम् । एवञ्च तत्र विहारस्थलानां दर्शनीयस्थलानामपि स्थापना कर्त्तव्या ।

**'महापणश्रेणियुतं भूरिद्रव्यैर्युतं क्वचित् ।'[10]**
**'वार्षिकं मासिकं स्थानं पाक्षिकं वा क्वचिन्मतम् ।**
**लोह-दारु-शिला-वेणुक्रयस्थानादिसंयुतम् ॥'[11]**

एवं तत्र महापणव्यापारस्य आपणाः भवितव्या ये विविधसामग्रिद्रव्यैः पूरिता स्युः । एतदरिक्तिं तत्र वार्षिक-मासिकरूपैरापणानां व्यवस्थाऽपि कर्त्तव्या विशेषरूपेण लोह्-काष्ठ-शिला-वेण्वादीनां विपणस्थलमपि भवेत् ।

**'तद्दुरभागकोणेषु चण्डालानामपि क्वचित ।**
**पुलिन्दानां किरातानां मांसविक्रयाणामपि ॥'[12]**
**'नीचानामपि दिक्कोणे स्थानं भूमिवशान्नयेत् ।**
**स्थलयोग्यं खलस्थानं क्वचित्तत्रैव कल्पयेत् ॥'[13]**

द्वारस्य दूरभागे कोणेष्वेव यत्र-कुत्र चाण्डाल-पुलिन्द-किरतादीनां कृतेऽपि स्थानयाबण्टनं कर्त्तव्यम् ।
निम्नवर्गस्य समुदायस्य व कृतेऽपि तत्र दिशः कोणेषु स्थानं प्रदाय आवासस्य व्यवस्था कर्त्तव्या । उपलब्धभूम्यनुसारं तत्र द्वारस्य समीपभागे एव यव-अन्नादिसमीकरणकाय खलस्थानस्य निर्माणमपि कर्त्तव्यम् ।

**'नृत्तस्थलयुतं वापि लोहकार्यालयान्वितम् ।**
**मुख्यद्वारं कल्पनीयं सुखदं शिल्पिभिः क्रमात् ॥'[14]**

एतदतिरिक्तं ग्रामस्य मुख्यद्वारं नृत्तस्थलेन युक्तं लोहकार्यालययुक्तं वा कर्त्तव्यम् । एवं प्रकारेण शिल्पी नगरस्य मुख्यद्वारं सुखदरूपेण कल्पितं कुर्यात्।

**सन्दर्भ ग्रन्थ :-**


1.बृहत्संहिता, ५२.६७
2.बृहत्संहिता, ५२.६८
3.बृहत्संहिता, ५२.८१-८२
4.स. शि. २०.११७ ,वास्तुसारः, डी. पी. त्रिपाठी
5.विश्वकर्मवास्तुशास्त्रम्, ६७.१
6.विश्वकर्मवास्तुशास्त्रम्, ६७.२
7.विश्वकर्मवास्तुशास्त्रम्, ६७.३
8.विश्वकर्मवास्तुशास्त्रम्, ६७.४
9.विश्वकर्मवास्तुशास्त्रम्, ६७.५
10.विश्वकर्मवास्तुशास्त्रम्, ६७.६ (श्लोकांशः)
11.विश्वकर्मवास्तुशास्त्रम्, ६७.७
12.विश्वकर्मवास्तुशास्त्रम्, ६७.९
13.विश्वकर्मवास्तुशास्त्रम्, ६७.१०
14.विश्वकर्मवास्तुशास्त्रम्, ६७.११